1142 Acc

प्रत्यभिज्ञा कारिका

Folios - 13
Size 20.5×11 cm

प्रत्याभिज्ञान कारिका

13

ॐ श्रीगुरुगणेशाय नमः॥ ॐ कथंचिदासाद्य महेश्वरस्य दास्यं जनस्याप्युपकां
रमिच्छन्, समस्तसंपत्समवाप्तिहेतुं तत्प्रत्यभिज्ञामुपपादयामि॥ १॥
अनंतं भावसंभारभासने स्पन्दनं परम्, उपोद्घातायते यस्य तं स्तुमः सर्व
दाप्रियम्॥ २॥ कर्त्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे॥ अजडात्मा
निषेधं वा सिद्धिं वा विदधीत कः॥ २॥ किंतु मोहवशादस्मिन् दृष्टेप्यनु
पलंभते॥ शक्त्याविष्करणेनेयं, प्रत्यभिज्ञोपदर्श्यते॥ ३॥ तथा हि ज
डभूतानां प्रतिष्ठा जीवदाश्रया॥ ज्ञानं क्रिया च भूतानां जीवतां जीवनं म
तम्॥ ४॥ तत्र ज्ञानं स्वतःसिद्धं, क्रिया कायाश्रिता सती, परैरप्युपलक्ष्ये
त तयान्यज्ञानमुह्यते॥ ५॥ इति प्रथममाह्निकम्॥ पूर्वपक्षतयायेन वि
श्वमाभास्य भेदतः॥ अभेदोत्तरपक्षान्तर्नीयते तं स्तुमः प्रियम्॥ ६॥

ननु स्वलक्षणाभासं ज्ञानमेकं परं पुनः। साभिलापं विकल्पाख्यं बहुधा
नापि तद्द्वयम्॥६॥ नित्यस्यैकस्य चिद्रूपस्तस्यात्रानवभासतः। अहं प्र
तीतिरप्येषा शरीराद्यवसायिनी ॥७॥ अथानुभवविध्वंसे स्मृतिस्तदनु
रोधिनी। कथं भवेन्न नित्यः स्यादात्मा यद्यनुभावकः॥८॥ सत्यं स्यात्स
निरुद्धश्चेत्तद्वाराद्दृष्टवस्तुषु॥९॥ स्मृतिः केनाथ यत्रैवानुभवस्तत्
देवासौ॥१०॥ यातोऽपि पूर्वानुभवसंस्कारात्स्मृतिसंभवः। यद्येवमंत
रेणापि कोऽर्थः स्यात्स्थायिनात्मना ॥११॥ ततो भिन्नेषु धर्मेषु तत्स्वरूपा
विशेषतः। संस्कारात्स्मृतिसिद्धौ स्यात्स्मर्ता द्रष्टेव कल्पितः॥१२॥ ज्ञा
नं च चित्स्वरूपं चेत्तदनित्यं किमात्मवत्। अथापि जडमेतस्य कथ
मर्थप्रकाशता ॥१३॥ अथार्थस्य यथारूपं यत्तेबुद्धिस्तथात्मनः। चैत

ई.प्र. २

3

न्यमजडस्यैवं जाड्ये नार्थप्रकाशता ॥१४॥ क्रियाप्यर्थस्य कायादेस्त
त्तद्देशादिजातता। नान्याद्दृष्टेर्न साप्येका क्रमिकैकस्य चोदिता ॥१५॥
तत्र तत्र स्थिते तत्तद्भवतीत्येवदृश्यते। नान्यन्नान्योऽस्ति संबंधः। कार्य
कारणभावतः। ॥१६॥ द्वित्वस्यानेकरूपत्वात्सिद्धस्यान्यानपेक्षण
त्। पारतंत्र्याद्ययोगाच्च तेन कर्तापि कल्पितः॥१७॥ इति द्वितीयाह्नि
कम्॥२॥ विनायेन न किंचित्स्यात्समस्तान्यपि दृष्टयः। अनस्तमित
संबोधं स्वरूपं तत्तु मे शिवम्। ॥१॥ सत्यं किंतु स्मृतिज्ञानं पूर्वानु
भवसंस्कृते। जातमप्यात्मनिष्ठं तन्नाद्यानुभववेदकम्॥ दृक्स्वाभा
सैव नान्येन वेद्या रूपदृशेव दृक्। रसे संस्कारजत्वं तु तत्तुल्यत्वं
न तद्गतिः॥ अथ तद्विषयत्वेऽपि स्मृतेस्तदवसायतः॥ दृष्टालंबनता

भ्रांत्या भ्रमदुपतया स्मृतेः ॥ स्मृतिर्नैव कथं तावद्ज्ञाते स्वार्थस्थितिः
कथम् ॥ पूर्वानुभवसंस्कारापेक्षा च किमितीष्यते ॥ भ्रांतित्वे चा
वसायस्य न जडाद्विषयस्थितिः ॥ ततो जाड्ये निजोल्लेखनिष्ठान्नार्थ
स्थितिस्ततः । एवमन्योन्यभिन्नानामपरस्परवेदिनाम् ॥ ज्ञानाना
मनुसंधानजन्मा नश्येज्जनस्थितिः ॥६॥ न चेदंतःकृतानंतवि
श्वरूपो महेश्वरः । स्यादेकश्चिद्वपुर्ज्ञानस्मृत्यपोहनशक्तिमान्
७॥२३॥ इति परदर्शनानुपपत्तिस्तृतीयाह्निकम् ॥ ॐ पदार्थरत्ननिक
रं निजहृद्गंजगुंजितम् ॥ ग्रंथं तं स्मृतिसूत्रांतःसंतत्यैव स्तुमः शिव
म् ॥ ॐ स हि पूर्वानुभूतार्थोपलब्धा परतोपि सन् ॥ विमृशन्स्मर
ति स्वैरी, स्मरतीत्यपदिश्यते ॥१॥ भासयेच्च स्वकालेर्थात्पूर्वाभासि

तमामृशन् । स्वलक्षणं घटाभासमात्रेणाथाखिलात्मना ॥२॥ न च
युक्तं स्मृतेर्भेदे स्मर्यमाणस्य भासनं । तेनैक्यं भिन्नकालानां संविदां वे
दितैष सः ॥३॥ नैव स्वानुभवो भाति स्मृतौ पूर्वोर्थवत्तथकः ॥ प्रागन्व
भूवमहमित्यात्मारोहेन भासनात् ॥४॥ योगिनामपि भासंते न दृ
ष्टादर्शनांतरे । स्वसंविदेकमानास्ता भांति मेयपदे पि वा ॥५॥ स्मर्यते
यं न्यगासीन्मे स एवमित्यपि भेदतः ॥ तद्व्याकरणमेवास्या मया दृष्टमि
ति स्मृतेः ॥६॥ याच पश्याम्यहमितिं घटोयमिति वावसा ॥ मन्यते
समेवतसां प्यवसातरि दर्शनम् ॥७॥ इरूदर्शनं यादृशं निजेन न शिवोहं
तादृशेनैव, तन्मया दृश्यते दृष्टोयं स इत्यामृशत्यपि । ग्राह्यग्रा
हकताभिन्नावर्थौ भातः प्रमातरि ॥८॥ इति स्मृतिशक्तिनिरूप

एंन्नम चतुर्थाह्निकं ॥ महागुरुतां निर्भग्नभावजातप्रकाशकः । ज्ञानशक्तिप्रदी
पेन यः सदा तं स्तुमः शिवम् ॥ १॥ ॐ वर्त्तमानावभासानां भावानामवभास
मेघव. नम् । अन्तःस्थितवतामेव घटते बहिरात्मना । १ प्रागिवार्थो प्रकाशः स्या ।
त्प्रकाशात्मतया विना । न च प्रकाशो भिन्नः स्यादात्मार्थस्य प्रकाश
ता । २॥ भिन्ने प्रकाशे चाभिन्ने संकरो विषयस्य तत् । प्रकाशात्मा प्र
काशोऽर्थो नाप्रकाशश्च सिध्यति ३॥ तत्तदाकस्मिकाभासो बाह्यं
चेदनुमापयेत् । न ह्यभिन्नस्य बोधस्य विचित्राभासहेतुना ॥४॥
ई॰प्र॰ ३ न वासनाप्रबोधोऽत्र विचित्रो हेतुतामियात् । तस्यापि तत्प्रबोधस्य ।
वैचित्र्ये किं निबंधनम् ॥५॥ स्यादेतदवभासेषु तेष्वेवावसिते सति ।
व्यवहारे किमन्येन बाह्येनानुपपत्तिना ॥६॥ चिदात्मैव हि देवोऽन्तः

स्थितमिच्छावशाद्बहिः । योगीव निरुपादानमर्थजातं प्रकाशयेत् ।७॥
अनुमानमनाभातपूर्वे नैवेष्टमिन्द्रियम् । आभातमेव बीजादेराभा
साद्धेतुवस्तुनः ॥८॥ आभासः पुनराभासाद्बाह्यस्यासीत् कथंचन ॥
अर्थस्य नैव तेनास्य सिद्धिर्नाप्यनुमानतः ॥९॥ स्वामिनश्चात्मसं
स्थस्य भावजातस्य भासनम् । अस्त्येव न विना तस्मादिच्छामर्शः प्र
वर्त्तते, बहीरूपतयाप्याभासे १०॥ स्वभावमवभासस्य, विमर्शं विदु
रन्यथा, प्रकाशोऽर्थोपरक्तोऽपि, स्फटिकादिजडोपमः ॥ आत्मात एव
चैतन्यं चित्क्रियाचितिकर्तृता । तात्पर्येणोदितस्तेन, जडात् स हि वि
लक्षणः । चितिः प्रत्यवमर्शात्मा परा वाक् स्वरसोदिता । स्वातंत्र्यमे
तन्मुख्यं तदैश्वर्यं परमात्मनः ॥१३॥ सा स्फुरत्ता महासत्ता देशका

स्वाविशेषिणी। सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः॥१४॥ आत्मानमत ए
वायं ज्ञेयीकुर्यात्पृथक्स्थिति। ज्ञेयं न तु तदौन्मुख्यात्खंड्येतास्य स्वतंत्र
ता॥१५॥ स्वातंत्र्यामुक्तमात्मानं स्वातंत्र्यादद्वयात्मनः। प्रभुरीशादिसंकल्पै
र्निर्माय व्यवहारयेत्॥१६॥ नाहंतादिपरामर्शभेदादस्यान्यतात्मनः। अ
हंमृष्टपयैवास्य सृष्टेस्तिङ्वाच्यकर्मवत्॥१७॥ मायाशक्त्या विभोः सैव
भिन्नसंवेद्यगोचरा। कथिता ज्ञानसंकल्पाध्यवसायादिनामभिः॥१८॥ सा
क्षात्कारक्षणेऽप्यस्ति विमर्शः कथमन्यथा॥ धावनाद्युपपद्येत प्रतिसंधा
नवर्जितम्॥१९॥ घटोऽयमित्यध्यवसा नामरूपातिरेकिणी। परेशशक्ति
रात्मेव भासते न त्विदंतया॥२०॥ केवलं भिन्नसंवेद्यदेशकालानुरोधतः।
ज्ञानस्मृत्यवसायादि सक्रमं प्रतिभासते॥२१॥ इति ज्ञानशक्तिनिरू

ई॰प्र॰ ४

पणं पंचममाह्निकम्॥५॥ स्वात्माभेदघनाभावांशतदपोहनटंकतः। छि
न्दन्तः स्वेच्छया चित्रं रूपं कुर्वन्तु मे शिवम्॥ अहंप्रत्यवमर्शो यः प्रका
शात्मापि वाग्वपुः। नासौ विकल्पः स ह्युक्तो द्वयाक्षेपी विनिश्चयः॥१॥
भिन्नयोरवभासो हि स्याद्घटाघटयोर्द्वयोः। प्रकाशस्यैव नान्यस्य भेदि
नस्त्ववभासनम्॥२॥ तदतत्प्रतिभाभाजा मात्रैवातद्व्यपोहनात्। त
न्निश्चयेन युक्तो हि विकल्पो घट इत्ययम्॥३॥ चित्तत्त्वं मायया हित्वा भिन्न
एवावभाति यः। देहे बुद्धावथ प्राणे कल्पिते नभसीव वा॥४॥ कादाचित्का
वभासे या पूर्वाभासादियोजना। संस्कारात्कल्पना प्रोक्ता सापि भिन्नावभा
सिनी॥५॥ तदेवं व्यवहारेऽपि प्रभुर्देहादिमाविशन्। भान्तमेवान्तरर्थौघ
मिच्छया भासयेद्बहिः॥६॥ एवं स्मृतौ विकल्पे वाप्यपोहनपरायणे।
ज्ञाने वाप्यन्तराभासः स्थित एवेति निश्चितम्॥७॥ किं तु नैसर्गिके

सं
ज्ञाने, बहिराभासनात्मनि, पूर्वानुभवरूपस्तु स्थितः स्मरणादिषु,
सनैसर्गिक एवास्ति विकल्पे स्वैरचारिणि। यथाभिमतसंस्थानाभा
सनाद्बुद्धिगोचरे। अत एव यथाभीष्टसमुल्लेखावभासनात्। ज्ञानक्रिये
स्फुटे एव, सिद्धे सर्वस्य जीवतः १०॥ इत्यपोहनशक्तिनिरूपणं ष
ष्ठाह्निकम्॥ ६॥ अनंतशक्तिरत्ननां यदेकाश्रयसंश्रयात्। विचित्र
चच्छिकोल्लाससंसिद्धिस्तंस्तुमःशिवम्॥ १॥ याचैषा प्रतिभा तत्तत्प
दार्थक्रमरूषिता, अक्रमानंतचिद्रूपः प्रमाता स महेश्वरः। तत्तद्विभि
ईप्रं ५ न्नसंवित्तिमुखैरेकप्रमातरि। प्रतितिष्ठत्सु भावेषु ज्ञातेयमुपपद्यते॥
२॥ देशकालक्रमजुषामर्थानां स्वसमापिना, सकृदाभाससाध्यो
सावन्यथा कः समन्वयः॥ प्रत्यक्षानुपलंभानां, तत्तद्भिन्नांशपातिनां,

6

कार्यकारणतासिद्धिहेतुतैकप्रमातृजा। स्मृतौ यैव स्वसंवित्तिः प्रमाणं
स्वात्मसंभवे, पूर्वानुभवसद्भावसाधनं सैव नापरम्। बाध्यबाधकभावो
पि, स्वात्मनिष्ठाविरोधिनाम्। ज्ञानानामुदियादेक, प्रमातृपरिनिष्ठि
ता। विविक्तभूतलज्ञानं त्सिध्येत्तस्याघटात्मता घटाभावमतिर्यथा।
तथा चेच्छुक्तिकाज्ञानं, रूप्यज्ञानाप्रमात्ववित्॥ नैवं शुद्धस्थलज्ञाना
त्सिध्येत्तस्याघटात्मता। नतूपलब्धियोग्यस्याप्यत्राभावो घटात्मनः।
पिशाचः स्यादनालोकोप्यालोकाभ्यंतरे यथा। अदृश्यो भूतलस्यांत,
र्न निषेध्यः स सर्वथा॥ विविक्तं भूतलं शुद्धज्ञावानांस्वात्मनिष्ठितः।
तत्कथं जातु तज्ज्ञानं भिन्नस्याभावसाधनम्। किंत्वालोकचयोंधस्य स्प
र्शो वोष्णादिकोस्फुटः। तत्रास्ति साधयेत्तस्य, स्वज्ञानमघटात्मताम्।

एवं रूपविदाभावरूपा शुक्तिर्मतिर्भवेत्। न त्वाद्य रजतज्ञप्तेः स्याद प्रामा
ण्यवेदिका। धर्म्यसिद्धेरपि भवेद्बाधा नैवानुमानतः। स्वसंवेदनसि
द्धा तु युक्ता सैकप्रमातृजा। इत्थमत्यर्थभिन्नार्थावभासखचिते विभौ।
समलो विमलो वापि व्यवहारोनुभूयते॥१४॥ इत्यैकाश्रयनिरूपणं स
प्तमाह्निकम्॥ स्वसंवेदनसंसिद्धव्यवहारवशेन यः। नित्यं महेश्वरः
सिद्धः सिद्धानां तं स्तुमः शिवम्॥१॥ ॐ तात्कालिकाक्षसामक्ष्य सापेक्षाः
केवलं क्वचित्। आभासा अन्यथान्यत्र त्वन्धान्धतमसादिषु। विशेषार्था
ई॰प्र॰ ८ वभासस्य सत्तायां न पुनः क्वचित्। विकल्पेषु भवेद्भाविभवद्भूतार्थगा
मिषु। सुखादिषु च सौख्यादिहेतुष्वपि च वस्तुषु। अवभासस्य सद्भा
वेप्यतीतत्वात्तथा स्थितिः। गाढमुल्लिख्यमाने तु विकल्पेन सुखा
दिके। तथा स्थितिस्तथैवस्यात्स्फुटमस्योपलक्षणात्। भावाभाव

8

वभासानां बाह्यतोपाधिरिष्यते। नात्मासत्तान्तरस्तेषां मांतराणां सदा। अ
न्तरत्वात्प्रमात्रैक्ये नैषां भेदनिबंधना। अर्थक्रियापि बाह्यत्वे सा भिन्नाभा
सभेदतः। चिन्मयत्वेवभासानामंतरेव स्थितिः सदा। मायया भासमाना
नां बाह्यत्वाद्बहिरप्यसौ। विकल्पे योयमुल्लेखः सोपि बाह्यः पृथक्प्रथः।
प्रमात्रैकात्म्यमांतर्यं ततो भेदो हि बाह्यता। उल्लेखस्य सुखादेश्च प्रका
शो बहिरात्मना। इच्छातो भर्तुरध्यक्षरूपोत्थादिभुवां यथा॥९॥ तदैक्येन वि
ना न स्यात्संविदां लोकपद्धतिः। प्रकाशैक्यात्तदेकत्वं मातैकः स इति स्थितम्॥१०
स एव विमृशत्वेन नियतेन महेश्वरः। विमर्श एव देवस्य शुद्धे ज्ञानक्रिये
यतः॥११॥ इति माहेश्वर्यनिरूपणमष्टमाह्निकम्॥ ज्ञानाधिकारः समा
प्तः॥ विततविश्वादस्वात्मादर्शे स्वशक्तिरसोज्ज्वला प्रकटयति यामात्मखां
प्ताप्रमेयतटद्वये। बहुतरभवद्भंगीभूमिं क्रियासरितं परां प्रकटयतु नः

श्रीमान्गौरीपतिः सततम्परम्। यत्र विश्रांतिमासाद्य चित्रं ज्ञीअविच्छिन्नमितम्।
क्रियाशक्तिप्रियात्यंतं दर्शयेत्तं स्तुमः शिवम्॥ अत एव यदप्युक्तं क्रिया नै
कस्य सक्रमा। एकेत्यादि प्रतिक्षिप्तं, तदेकस्य समर्थनात्॥ सक्रमत्वं च
लौकिक्याः क्रियायाः कालशक्तितः। घटते न तु शाश्वत्याः प्राभव्यास्या
त्प्रभोरिव॥ कालः सूर्यादिसंचारस्तत्तत्पुष्पादिजन्म वा, शीतोष्णे वा
थ तल्लक्ष्यः क्रम एव स तत्वतः। क्रमो भेदाश्रयो भेदोप्याभाससदसत्वतः
आभाससदसत्वे तु, चित्राभासकृतः प्रभोः। मूर्तिवैचित्र्यतो देशक्रम
माभासयत्यसौ, क्रियावैचित्र्यनिर्भासात्कालक्रममपीश्वरः। सर्व
त्राभासभेदोपि भवेत्कालक्रमाकरः। विच्छिन्नभासः शून्यादेर्मातुर्भा
तस्य नोदयात्। देशक्रमोपि भावेषु, मातुर्भाति मितात्मनः। स्वात्मेव
स्वात्मना पूर्णा भावा भांत्यमितस्य तु। किंतु निर्माणशक्तिः साप्येवं वि

ई॰प्र॰

८

दुष ईशितुः। तथा विज्ञातृविज्ञेयभेदो यदवभास्यते, इति क्रियाशक्ति
निरूपणं प्रथममाह्निकम्॥ विरोधमविरोधं च स्वेच्छयैवोपपादयन्,
भेदाभेदौ च यो मंत्रतत्त्ववित्तं स्तुमः शिवम्॥ क्रियासंबंधसामान्यद्र
व्यदिक्कालबुद्धयः। सत्याः स्थैर्योपयोगाभ्यामेकानेकाश्रया मताः १,
तत्रैकमांतरं तत्त्वं, तदेवेन्द्रियवेद्यतां, संप्राप्यानेकतां याति देशकाल
स्वभावतः। तत्तद्द्वयालंबनता मनोनुव्यवसायि सत्। करोति मातृ
व्यापारमयीः कर्मादिकल्पनाः ३॥ स्वात्मनिष्ठा विविक्ताभा भावा एक
प्रमातरि। अन्योन्यान्वयरूपैक्ययुजः संबंधधीपदम्। ४ जातिद्र
व्यावभासानां, बहिरप्येकरूपतां। व्यक्त्येकदेशभेदं वा, प्यालंबते
विकल्पनाः ५॥ क्रियाविमर्शविषयः कारकाणां समन्वयः। अत

ष्ववधिमज्ञात्वान्वयालंबाद्दिगादिधीः। एवमेवादिसिद्धिः स्यान्मातुरर्थक्रि
यात्मनः। भेदाभेदवतार्थेन, तेनन व्यतिरीदृशी, २।१०४ इतिभेदाभेदविमर्शा
नं द्वितीयमाह्निकं समाप्तम्॥ प्रमाणानिप्रमावेशोस्वबलाक्रमणक्रमात्।
यस्यवक्त्रावलोकीनि प्रमेयं तंस्तुमः शिवं॥ इदमितादृगित्येवं यद्वशाद्व्य
वतिष्ठते, वस्तुप्रमाणं तत्सोपि स्वाभासोभिनवोदयः॥१॥ सोंतस्तथाविम
र्शात्मादेशकालाद्यभेदिनि, एकाभिधानविषयेमितिर्वस्त्वन्यबाधिता,
२॥ यथारुचियथार्थित्वं यथाव्युत्पत्तिभिद्यते। आभासोप्यर्थ एकस्मि
ई० प्र० ८ न्ननुसंधानसाधिते॥३॥ दीर्घवृत्तोर्ध्वपुरुषधूमचान्दनतादयः। ये
ह्याभासाविभिद्यंते, देशकालाविभेदिनः। तथैवसन्त्वुटद्रव्यकांचनो
ज्वलतादयः। आभासभेदाभिन्नार्थकारिणस्तेपदंध्वने॥ आभासभेदा
द्वस्तूनांनियतार्थक्रियापुनः। सामानाधिकरण्येन प्रतिभासादभेदि

9

नाम्। दृश्यद्दीपप्रकाशानां स्रोतसां सागरे यथा। अविरुद्धावभासानामै
ककार्यातथैक्यधीः। तत्राविशिष्टेवह्न्यादौ कार्यकारणतास्थिता। तत्तच्छ
द्धार्थताद्यात्मा प्रमाणादेकतामतः। सातुदेशाधिकाध्यक्षांतरभिन्ने स्वलक्ष
णे, तात्कालिकीप्रवृत्तिः स्यादर्थिनोप्यनुमानतः। दूरांतिकतयार्थानां,
परोक्षाध्यक्षतात्मना। बाह्यांतरतयादोषैर्व्यंजकस्यान्यथापि वा। भिन्ना
वभासच्छायानामपिमुख्यावभासता। एकमन्यवमर्शाख्यादेकत्वमनि
वारितम्। अर्थक्रियापिसहजानार्थानामीश्वरेच्छया। सयतासाहितेना
स्यानाक्रियातोन्यताभवेत्। रजतेकविमर्शोपिशुक्तौनरजतस्थितिः।
उपाधिदेशासंवादाद्विचन्द्रेपिनभान्यथा। गुणैः शब्दादिभिर्भेदोजा
त्यादिभिश्चभिन्नता। भावानामित्थमेकत्र प्रमातर्युपपद्यते। विश्ववै
चित्र्यचित्रस्य सममित्तितलोपमे, विरुद्धभावसंस्पर्शपरमार्थस

तीश्वरे। प्रमातरि पुराणे तु सर्वदाभातविग्रहे। किं प्रमाणं नवाभासः
सर्वप्रमितिभागिनि। अप्रवर्त्तितपूर्वोऽत्र केवलं मूढतावशात्। शक्तिप्रका
शेनेशादिव्यवहारः प्रवर्त्यते॥ इतीश्वरप्रत्यभिज्ञायां मानतत्फलमेय
निरूपणं नाम तृतीयमाह्निकम् ॥ भावानाभासयन्कर्त्ता विमले स्वात्मद
र्पणे। कार्यकारणभावं च यश्चिनोति स्तुमः शिवम्। ओं एष चानन्तशक्ति
त्वादेवमाभासयत्यमून्। भावानिच्छावशादेषा क्रिया निर्मातृतास्य
सा ॥१॥ जडस्य तु न सा शक्तिः सत्ता यदसतः सतः ॥ कर्तृकर्मत्वतत्त्वैव
कार्यकारणता ततः ॥२॥ यदसत्तदसद्युक्ता नासतः सत्स्वरूपता। स
तोऽपि न पुनः सत्तालाभेनार्थोऽथ चोच्यते। कार्यकारणता लोके सान्तर्वि
परिवर्त्तिनः ॥३॥ उभयेन्द्रियवेद्यत्वं तस्य कस्यापि शक्तितः ॥ एवमे
का क्रिया सैषा सक्रमान्तर्बहिःस्थितेः। एकस्यैवोभयाकारसहिष्णो

रुपपादिता। बहिस्तस्यैव तत्कार्यं यदन्तर्यदपेक्षया। प्रमात्रपेक्षया
चोक्ता द्वयी बाह्यान्तरस्थितिः। मातैव कारणं तेन स चाभासद्वयस्थितौ।
कार्यस्य स्थित एवैकस्तदेकस्य क्रियोचिता ॥७॥ अत एवाङ्कुरेऽपीष्टो
निमित्तं परमेश्वरः। तदन्यस्यापि बीजादेर्हेतुता नोपपद्यते ॥८॥
तथाहि कुंभकारोसौ वैश्वर्यैच व्यवस्थया। तत्तन्मृदादिसंस्कार
क्रमेण जनयेद्घटम्। ९॥ योगिनामपि मृद्बीजे विनैवेच्छावशेन
तत्। घटादि जायते तत्तत्स्थिरस्वार्थक्रियाकरम् ॥१०॥ योगिनिर्मा
णताभावे प्रमाणान्तरनिश्चिते। कार्ये हेतुः स्वभावो वा तत एवोत्पत्ति
मूलजः ॥११॥ भूयस्तत्तत्प्रमात्रेकवह्न्याभासादितो भवेत्। परोक्षा
दप्यधिपते धूमाभासादिनूतनम्। कार्यमव्यभिचार्यस्य लिंगमन्य
प्रमातृगात्। तदाभासस्तदाभासादेवत्वधिपतिः परः। अस्मिन्सतीद

मस्तीतिकार्यकारणतापिया, साप्यपेक्षाविहीनानांजडानांनोपपद्यते, न
हिस्वात्मैकनिष्ठाना, मनुसंधानवर्जिताम्। सदसत्त्वापदेप्येषसप्तम्यर्थ
प्रकल्पते। अतएवविभक्त्यर्थः प्रमात्रेकसमाश्रयः। क्रियाकारकभावा
ख्या युक्तोभावसमन्वयः। परस्परस्वभावत्वेकार्यकारणयोरपि, एकत्व
मेवभेदेहिनैवान्योन्यस्वरूपता। एकात्मनोविभेदश्च, क्रियाकालक्र
मानुगा, तथास्यात्कर्तृतैवैवंतथापरिणमत्तया। नचयुक्तंजडस्यैवं, भे
ई प्रः दाभेदविरोधतः। आभासभेदादेकत्रचिदात्मनितुयुज्यते। वास्तवेपि
चिदेकत्वे, नस्यादाभासभिन्नयोः। चिकीर्षालक्षणैकत्व, परामर्शं
१० विनाक्रिया। इत्थंतथाघटपटाद्याभासजगदात्मना, तिष्ठासोरेव
मिच्छैवहेतुताकर्तृताक्रिया। इतिकार्यकारणतत्त्वनिरूपणंचतु
र्थमाह्निकंसंपूर्णं। आद्यंक्रियाधिकारोनामद्वितीयोविमर्शः॥ ॥
5

अथतत्त्वार्थसंग्रहाधिकारः॥ यंप्राप्यसर्वागमसिंधुसङ्घः पूर्णत्वमभ्येतितिष्ठ
तार्थतांच, तंनौम्यहंपूर्णाभवतत्त्ववित्तिं, रत्नौघसारंपरमागमाब्धिम्॥
श्रीमत्सदाशिवोदार, प्रारंभव - - - - - सु, यदंतर्भातितत्त्वानांचक्रांतंसं
स्तुमःशिवम्॥ ॐ एवमंतर्बहिर्वृत्तिः, क्रियाकालक्रमानुगा। मातुरेवत
दन्योन्याविद्युक्तेज्ञानकर्मणी। किंत्वांतरदशोद्रेकात्सादाख्यंतत्त्वमा
दितः। बहिर्भावपरत्वेतु, परतः पारमेश्वरम्। ईश्वरोबहिरुन्मेषोनि
मेषोतःसदाशिवः। सामानाधिकरण्यंच, सद्विद्याहमिदंधियोः।
इदंभावोपपन्नानांवेद्यभूमिमुपेयुषां, भावानांबोधसारत्वाद्यथाव
स्त्ववलोकनात्। अत्रापरत्वंभावानामनात्मत्वेनभासनात्, परता
हंतयाच्छादात्परापरदशाहिसा। भेदधीरेवभावेषुकर्तुर्बोधात्म
नोपिया। मायाशक्त्यैवसाविद्येत्यन्येविद्येश्वरायथा। तस्यैश्वर्य

स्वभावस्य पशुभावे प्रकाशिका। विद्याशक्तिस्तिरोधानकरी मायाभिधा
पुनः। शून्ये बुद्धौ शरीरे वा मायाशक्तिर्विजृंभते। यश्च प्रमाता शून्यादिः
प्रमेये व्यभिचारिणि। माता समेयः सन्कालादिकपंचकवेष्टितः। त्रयो
विंशतिधीमयं याकार्यकारणात्मकम्। तस्या विभागरूपं च प्रधानंमू
लकारणम्। त्रयोदशविधा चात्र बाह्यंतःकरणावली। कार्यवर्गश्च द
शधा। स्थूलसूक्ष्मत्वभेदतः। १२ आदितः ११५३॥ इति ईश्वरप्रत्यभि
ज्ञायामागमाधिकारे तत्वनिरूपणं प्रथमाह्निकम्॥ ॐ नमः शिवाय॥
ई॰ प्र॰ ११ अखंडितस्वभावोपि। विचित्रां मातृकल्पनाम्। स्वहृन्मंडलचक्रेषु
प्रथयेत्तं स्तुमः शिवम्॥ तत्रैतन्मातृतामात्रस्थितौ रुद्रोधिदैवतं।
भिन्नप्रमेयप्रसरे ब्रह्मविष्णू व्यवस्थितौ। एष प्रमाता मायांधः सं
सारी कर्मबंधनः। विद्याभिज्ञापितैश्वर्यः चिद्घनो मुक्त उच्यते।

६

स्वांगरूपेषु भावेषु प्रमाता कथ्यते पतिः। मायातो भेदिषु क्लेशकर्मादि
कलुषः पशुः। स्वातंत्र्यहानिर्बोधस्य स्वातंत्र्यस्याप्यबोधता। द्विधाण
वं मलमिदं स्वस्वरूपापहानितः। भिन्नवेद्यप्रथात्रैव मायाख्यं जन्मभो
गदम्। कर्तर्यबोधे कार्मं तु मायाशक्त्यैव तत्त्रयम्। शुद्धबोधात्मकत्वेपि
येषां नोत्तमकर्तृता। निर्मिताः स्वात्मनो भिन्ना भर्त्रा ते कर्तृतात्ययात्।
बोधादिलक्षणैक्येपि तेषामन्योन्यभिन्नता। तथेश्वरेच्छाभेदेन तेच
विज्ञानकेवलाः। शून्याद्यबोधरूपास्तु कर्त्तारः प्रलयाकलाः। तेषां
कार्मो मलोप्यस्ति। मायीयस्तु विकल्पितः। बोधानामपि कर्तृत्वजुषां
कामममलस्तितौ। भिन्नवेद्यजुषां मायामलो विद्येश्वराश्चते। देवादीनां
च सर्वेषां भविनां त्रिविधं फलम्। तत्रापि कार्मणमेकमुख्यं संसारका
रणम्। कलोद्दलितमतश्च चित्तत्त्वं कर्तृतामयम्। अचिद्रूपस्य शून्या

देर्मितं गुणतया स्थितम्। शून्यत्वं कल्पितायाश्च बोधस्य च चिदात्म
नः। शून्यादौ तद्गुणे ज्ञानं तत्समावेशलक्षणम्। शून्ये बुद्ध्याद्यभा
वात्मन्यहंता कल्पितापदे। अस्फुटरूपसंस्कारमात्रिणि ज्ञेयशून्यता।
साक्षात्प्राणमांतरी वृत्तिः प्राणादि प्रेरकात्मता। जीवनाख्याथवा प्राणे हंता
पुर्यष्टकात्मिका। तावन्मात्रस्थितौ प्रोक्तं सौषुप्तं प्रलयोपमम्। सवेद्य
मपवेद्यं च मायामलयुतायुतम्। मनोमात्रपथेप्यक्ष विषयत्वेन विभ्र
मात्। स्पष्टावभासा भावानां सृष्टिः स्वप्नपदं मतम्। सर्वाक्षगोचरत्वेन
या तु बाह्यतया स्थिरा। सृष्टिः साधारणी सर्वप्रमातॄणां स जागरः। हे
यात्तुर्यीयं प्राणदेः प्राधान्यात्कल्पितागुणे। तद्व्यानाच्च चय प्रायस्तु स्वडुः
स्वादियोगतः॥१३॥ प्राणापानमयः प्राणः प्रत्येकं स्वप्नजाग्रतोः। त
स्यैकदात्मा समानाख्यः सौषुप्ते विषुवत्स्विव॥१४॥ मध्योर्ध्वगाम्युदा

नाख्यस्तुर्यगो हुतभुग्मयः। विज्ञानाकलमंत्रेशो व्यानो विश्वात्मकः परः॥१
५॥ इति प्रमातृतत्त्वनिरूपणं द्वितीयाह्निकं समाप्तम्। अनंतमानमेयादिवै
चित्र्याभेदशालिनं आत्मानं यः प्रथयते भक्तानां तं स्तुमः शिवम्॥ ओं स्वा
त्मैव सर्वजंतूनामेक एव महेश्वरः। विश्वरूपो हमिदमित्यखंडामर्शबृंह
तः॥ तत्र स्वच्छन्दे भोगे बुद्ध्यादिग्राहकात्मना। अहंकारपरामर्शपदं
नीतमनेन तत्। स्वस्वरूपापरिज्ञानमयो नेकः पुमान्मतः। तत्र स्रष्टौ क्रि
यानन्दौ। भोगो दुःखसुखात्मकः। स्वांगरूपेषु भावेषु पत्युर्ज्ञानं क्रिया
च या। मायात्ततीये ते एव, पशोः सत्त्वं रजस्तमः। भेदस्थितेः शक्तिमतः
शक्तित्वं नापदिश्यते। एषां गुणानां करणकार्यत्वपरिणामिनाम्। सत्त्वा
नन्दः क्रियापत्यस्तदभावोपि सा पशोः। द्वयात्मा तद्रजो दुःखं श्लेषि
सत्त्वतमोमयम्। येप्यसामयिके दंतापरामर्शभुवः प्रभोः। ते विमिश्रा

विभिन्नाश्च,तथाचित्रावभासितः। तेतुभिन्नावभासार्थाः प्रकल्प्याः प्रत्यगा
त्मनः। तत्रद्विभिन्नसंज्ञाभिः स्मृत्युत्प्रेक्षादिगोचरे। तस्यासाधारणीसृ
ष्टिःरीशसृष्ट्युपजीविनी। सैषाप्यज्ञतयासत्यै,वेशशक्त्यातदात्मनः। स्व
विश्रांत्युपरोधायचलयाप्राणरूपता। विकल्पक्रिययातत्तद्वर्णवैचि
त्र्यरूपया। साधारणोन्यथाचैशः सर्गःस्पष्टावभासनात्, विकल्पहाने
नैकाग्र्यात्क्रमेणैश्वरतापदम्। सर्वोममायंविभवइत्येवंपरिजानतः।
ई॰ प्र॰ १३ विश्वात्मनोविकल्पानांप्रसरेपिमहेशता॥१॥ मेयंसाधारणंमुक्तः,
स्वात्माभेदेनमन्यते। महेश्वरोयथाबद्धः पुनरत्यंतभेदवत्। सर्वथा
त्वंतरालीना।नंततत्वौघनिर्भरः। शिवश्चिदानंदघनः परमाक्षरविग्र
हः। एवमात्मानमेतस्यसम्यक्ज्ञानक्रियेतथा। जानन्यथेप्सितान्प
श्यञ्जानातिचकरोतिच॥ इतिप्रकटितोमयासुघटएषमार्गोनवोम

हागुरुभिरुच्यते,स्मशिवदृष्टिशास्त्रेयथातदत्रनिदधत्पदंभुवनकर्तृता
मात्मनोविभाव्यशिवतामयीमनिशमाविशन्सिध्यति॥ तैस्तैरप्युपयाचि
तैरुपनतस्तन्व्याः स्थितोप्यंतिकेकांतोलोकसुपरिज्ञातोनरंतुंयथालोक
स्यैषतथानवेक्षितगुणः स्वात्मापिविश्वेश्वरोनैवायंनिजवैभवायतदियं
तत्प्रत्यभिज्ञोदिता॥ जनस्यायत्नसिध्यर्थमुदयाकरसूनुना॥ ईश्वरप्र
त्यभिज्ञेयमुत्पलेनोपपादिता १९१॥ आदितः॥ एषाभिनवगुप्तेन, सूत्रा
र्थप्रविमर्शिनी। रचिताप्रत्यभिज्ञायांलघ्वीवृत्तिरभंगुरा। वाक्यप्रमाणप
दतत्वसदागमार्थाः स्वात्मोपभोगसुपयात्यमुतः स्वशास्त्रात्। भौमानुर
सांजलमयांश्चनसस्यपुष्टौभुक्त्वार्कमेकमिहयोजयितुंक्षमान्यः। आत्मा
नमनभिज्ञायविविक्तंयोन्यदिच्छति, तेनभीतेनकिंवाच्यंप्रश्नेस्मिन्को
भवानितिशिवम्॥ यतः पूर्वलिखितात्तत्रायंश्लोकः। श्रीमत्सोमानन्दव

ग्रंथोलिखद्वा स्मद्धीमेता प्रत्यभिज्ञाविवृतिम्। सोमानन्दो बालभावे हृदंतः
संवासिन्यादेवकेव्यानियुक्तः। ततो लिखितो येन तस्यायं श्लोकः॥ संवित्
घ्नन्पाज्ञानमद्विन्दुनादानित्यं शंभोभैरवेत्याप्रनादाः। श्रंतर्वासिहृज्जस
रोजार्कपादाः श्रीमद्रामानंदपादाजयंति। श्रीमदाचार्यकोलेन श्रीवे
न लिखिता ततः। कोललक्ष्मीकांतकेन ततोपि लिखिताचया। लक्ष्मीस्वप्र
त्यभिज्ञाविवृतिसन्मनोरमा। फतिचन्द्रेन कौलस्य गोपालस्यापि हित
वे। ततो विक्रयकाले तु कर्यं विक्रीतवान्छ्रती। साधुकाशीनाथनामा द्विद
यामुदे मम। अनुजस्यानंतरम्यटीकारामस्य धीमतः। मयेयं कारिकामू
लष्टत्याः संक्षेपकारिका। कारिका शिवभावस्य लिखिता दुःखहारि
का सर्वालाः स्युपूर्क्तरस्य सांवस्यं सगणस्य च॥ श्रीमट्टीकाराम
साधुगतेः प्रीत्यै शिवायनः॥ शुभमस्तु सर्वजगताम् शुभमस्तु॥

मुद्रा कीयते भवसंभयः

NATIONAL MISSION FOR MANUSCRIPTS
MANUS DATA

S-952
DSO 00018583

Record No.	Organization / Individual 8583

Name of the Institution	Oriental Research Library University Campus, Hazaratbal, Srinagar.	Communication Address	Department of Libraries and Research Municipal Complex, Karanagar, Srinagar.
Personal Collection			

Title of the Text Īśvara Pratyā-bhijñākārikā. Other Title	Bundle No:.................. Acc. No./Manuscript No......1142....
Author Utpala Deva.	No. of Folios......13 (14)..........Pages.......26....................
Commentary	Size of Mss. 20·5 x 11 cm Material: Paper/palm leaf/birch-bark/cloth/leather/others
Commentator Scriber:- Mattikarāma	Missing portion No
Language Sanskrit	Illustrations No Complete/Incomplete
Script Devanāgarī	Condition: Good/bad/brittle/worm eaten.Fungus/Stuck
Date of Manuscript	Source of Catalogue: Descriptive/Hand list/Alphabetical/Index card
Key words Darśan	Colour of Manuscripts yellow Cover
Subject Śaivaism.	Remarks ~~[illegible]~~ Loose Folios.

1603

8.12.05